2026

संस्कृतवेदाध्ययनविभाग:

MASVSC401

अथर्ववेदीयसाहित्यम्

Full Marks: 80

Time: 3 Hours

(The figures in the margin indicate full marks for the questions)

लघूत्तराणि प्रदेयानि - **1×10=10**

1. वेनः कः?
2. 'रामा' इत्यस्य अपरं नाम किम्?
3. प्रलयनम् इत्यनेन किं ज्ञायते?
4. 'स्वः' इति शब्देन किं बुध्यते?
5. 'कृणोमि' इत्यस्य लौकिकरूपं किम्?
6. 'प्रतरणः'इति शब्दस्य कोऽर्थः?
7. दुन्दुभिः कस्य देवस्य मुष्टिरस्ति?
8. दर्भस्य केशान् के न आकर्षन्ति?
9. 'तूलम्'इति पदस्य अर्थः कोऽस्ति?
10. कौशिकगृह्यसूत्रस्योपरि केन वृत्तिः विरचिता?

अधस्तनेषु ***केषाञ्चित् पञ्चानां*** व्याख्या विधेया - **6×5=30**

11. आसुरी चक्रे प्रथमेदं किलासभेषजम् इदं किलासनाशनम्।
    अनीनशत् कलासं सरूपाम् अकरत् त्वचम्॥
12. इदं जनासो विदथ महद् ब्रह्म वदिष्यति।
    न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः॥
13. स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा।
    यो देवानां नामध एक एव तं संप्रश्नं भुवना यन्ति सर्वा॥

14. मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।
    सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥
15. उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते वन्वतां विष्ठितं जगत्।
    स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् दवीयो अप सेध शत्रून्॥
16. दर्भेण देवजातेन दिवि ष्टम्भेन शश्वदित्।
    तेनाहं शश्वतो जनाँ असनं सनवानि च॥
17. आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च।

अधोलिखितेषु प्रश्नेषु ***केषाञ्चित्चतुर्णामुत्तराणि*** प्रदेयानि - **10×4=40**

18. किलासपलितनाशनसूक्तानुसारं कुष्ठरोगस्य भेषजानां माहात्म्यं सरलसुरगिरा लिख्यताम्।
19. ऐक्यभावनिरूपणे सांमनस्यसूक्तस्य तात्पर्यमुल्लिख्यताम्।
20. रथसूक्तमधिकृत्य एको निबन्धो लेखनीयः।
21. आयुर्वर्धने दर्भसूक्तस्य तात्पर्यमुल्लिख्यताम्।
22. वेनसूक्तस्य दार्शनिकतत्त्वमुल्लिख्यताम्।
23. कौशिकगृह्यसूत्रमधिकृत्य एको लेखः प्रस्तूयताम्।

****